# Vishvavasuproktam Shivabhidhanashravanamahimanuvarnanam

# વિશ્વાવસુપ્રોક્તં શિવાભિધાનશ્રવણમહિમાનુવર્ણનમ્

## Document Information

Text title : Vishvavasuproktam Shivabhidhanashravanamahimanuvarnanam

File name : vishvAvasuproktaMshivAbhidhAnashravaNamahimAnuvarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 20 | 189-203 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# વિશ્વાવસુપ્રોક્તં શિવાભિધાનશ્રવણમહિમાનુવર્ણનમ્

વિશ્વાવસુઃ -
ધન્યોઽસિ માન્યોઽસિ ગણાગ્રગણ્ય વિશ્વેશ્વરારાધનતત્પરોઽસિ ।
ત્વત્પાદપદ્માર્ચનતોઽપિ મુક્તિઃ સમ્ભાવિતા સ્યાદ્ગિરિશપ્રસાદાત્ ॥ ૧૮૯॥

શઙ્કરાઙ્ઘિકમલાર્ચનાદપિ પ્રીત એવ ભગવાનુમાપતિઃ ।
શઙ્કરેષુ ખલુ તસ્ય સર્વથા પ્રીતિરેવ ગિરિશઃ સ શામ્ભવઃ ॥ ૧૯૦॥

સમર્ચિતઃ સ્યાત્ યદિ શામ્ભવસ્તદા સાક્ષાન્મહેશોઽપિ સમર્ચિતઃ સ્યાત્ ।
ઈશાભિમાનઃ ખલુ શામ્ભવેષુ તે દુર્લભાઃ કિં શિવયોગિનોઽપિ ॥ ૧૯૧॥

ધન્યાસ્તે શિવયોગિનઃ શિવપદામ્ભોજાર્ચનારાધન-
ધ્યાનાનન્દરસપ્રસાધનરસાઃ સંસારવાર્તાલસાઃ ।
તેષાં પૂજનમેવ તાબદધુના સંસારદુઃખાપહં
તત્સઙ્ગાત્ ખલુ શઙ્ગમઙ્ગલકથાપીયૂષધારાર્ણવઃ ॥

અહો વિચિત્રં ખલુ શામ્ભવાનાં ચરિત્રમત્યદ્ભુતમપ્યચિત્રમ્ ।
ચિત્રં કિમત્રાસ્તિ પવિત્રવાર્તા કરોતિ તાવત્પરમં પવિત્રમ્ ॥ ૧૯૩॥

કઃ શઙ્કરાર્ચનપરો ન સુરો નરો વા સર્વે સુરા અપિ તદઙ્ઘ્રિસમર્ચનેન ।
ધન્યા ભવન્તિ બહવો ભુવિ શામ્ભવાઃ કિં વીરેશ્વરાર્ચનપરઃ ખલુ કોઽપિ શૈવઃ ॥ ૧૯૪॥

વીરેશ્વરાનુગ્રહપાત્રમેકઃ સ બાલ્યમારભ્ય શિવાર્ચકઃ સન્ ।
વયઃ શિવારાધનસાધનેષુ પરં ચકારામરહારવીરઃ ॥ ૧૯૫॥

ભવાનિહૈકો ભગવત્પ્રસાદાત્ અભ્યાગતો મત્સુકૃતૈરપારૈઃ ।
ત્વયા તુ તાવદ્ભિરિશાર્ચનાય સમાગતં પાવયિતું ગૃહં મે ॥ ૧૯૬॥

અસ્માકં ગૃહમેધિનામપિ બહુ ત્વત્પાદસક્ષાલનાત્
તત્પ્રક્ષાલનજાતપુણ્યસલિલાસેકાનુપાનાદિના ।
ત્વત્પાદામ્બુજરેણુભિઃ પરમિદં સમાપિ મે પાવનં
મદ્વંશોઽપ્યતિપાવનઃ સ તુ મહાન્ ત્વં શામ્ભવો દુર્લભઃ ॥ ૧૯૭॥

મનાગપિ તથા પુરા શિવકથાસુધાસાગરઃ શ્રુતઃ શ્રવણપાવનઃ શ્રવણપાત્રપીતો મુહુઃ ।
અતઃ પરમહં મુદા ગિરિશપાદપદ્માર્ચનં કરોમિ કરુણામ્બુધે શિવપદામ્બુજારાધકઃ ॥ ૧૯૮॥

શ્રોત્રં પવિત્રં મમ જાતમદ્ય ગાત્રં મમૈતત્ સુતરાં પવિત્રમ્ ।
ત્વદુક્તવિશ્વેશકથાસુધાબ્ધિતરઙ્ગમાલાકલિતોઽહમેવ ॥ ૧૯૯॥

જન્માન્યતીતાનિ બહૂનિ તેષુ મહેશ્વરાપારકથાસુધાબ્ધિઃ ।
નાકર્ણિતો નાપ્યનુસન્ધિતો વા ન ચાર્ચિતો વાપ્યમૃતત્વસિદ્ધ્યૈ ॥ ૨૦૦॥

કિં તૈર્જન્મભિરપ્યપારતરુણીસંસારવાર્તારસ-
વ્યાપારૈરપરાધકોટિસહિતૈર્યૈઃ શઙ્કરો નાર્ચિતઃ ।
ન ધ્યાતોઽપિ ન ચ શ્રુતોઽપિ નયનૈર્દૃષ્ટોઽપિ કષ્ટાર્ણવા-
દુદ્ધર્તું સ સમર્થ ઇત્યનુદિનં નારાધિતો વૈભવૈઃ ॥ ૨૦૧॥

બ્રહ્માદ્યૈરપિ યત્પદામ્બુજરજઃપૂજાર્થમત્યદ્ભુતં
તપ્તં ઘોરતરં તપોઽપિ બહુધા ધર્માઃ કૃતાઃ કોટિશઃ ।
તત્પાદસ્મરણં કદાપિ ન કૃતં દારૈઃ પરં વઞ્ચિતો
ભોગૈરપ્યમિતૈરતઃ પરમહં પૂતસ્ત્વદાલોકનાત્ ॥ ૨૦૨॥

અદ્યાગત્ય મહેશ્વરામૃતકથાપીયૂષધારા પરા
દત્તા સા ત્વદનુગ્રહેણ સતતં સંરક્ષણીયા મયા ।
સેયં કણ્ઠમણિર્મમાસ્તુ સુકૃતૈઃ યૈર્યૈઃ શ્રુતા સા કથા
તે સર્વેઽપિ શિવાભિધાનસુધયા ક્તાઃ સમન્તાદપિ ॥ ૨૦૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિશ્વાવસુપ્રોક્તં શિવાભિધાનશ્રવણમહિમાનુવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૨૦। ૧૮૯-૨૦૩ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 20. 189-203 ..

Notes:
Viśvāvasu વિશ્વાવસુ (a Gandharva ગન્ધર્વ)narrates his experience and expresses gratitude to Nandikeśa નન્દિકેશ about the merits of worshiping and listening to discourses about Śiva શિવ.

Proofread by Ruma Dewan

*Vishvavasuproktam Shivabhidhanashravanamahimanuvarnanam*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*